Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 6 | ISSN : 2582-0095

# व्याकरणपदार्थविचार:



**डॉ. सन्तोष माझी**
**व्याकरणविभाग:, सहाध्यापक:**
**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:**

**शोधालेखसार:** – इयं हिमोक्षमाणानामजिह्माराजपद्धति: इति वाक्ये इयमिति शब्द: व्याकरणविद्यापदवाच्य:। तत्र व्याकरणशब्दस्य कोऽर्थ: इति ज्ञानपिपासुनां ज्ञानाय प्रबन्धोऽयं रचित: मया। अत्र अस्य शब्दस्य पूर्वपक्षीणां मतमुपस्थाप्यसूत्रमेवार्थ : इतिसंक्षेपेणप्रतिपादितं मया।

**मुख्य शब्द–** व्याकरणम्, पदार्थ, शब्द:, सूत्रं, वार्तिकम्|

---

व्याकरणम् इतिशब्देनक: अर्थ: बोध्यते इत्याशयेन भाष्ये प्रश्न: विहित: यथा –

**अथ व्याकरणमित्यस्य शब्दस्य क: पदार्थ: ?इति।**

सूत्रं, वार्तिकम्, उदाहरणंव्याख्यानम् इत्येवामादिषुअर्थेषु व्याकरणशब्देन बोध्य: अर्थ:क:इति प्रष्टुराशय:। एवंप्रश्नेआगतेसतिभगवता भाष्यकृतासमाहितं यथा- **सूत्रम्**इति।

**सूत्रम्इति।**

**वृद्धिरादैच** १/१/१इति सूत्रादारभ्य **अ अ** ८/४/६८इतिसूत्रं यावत् अष्टाध्याय्यां पठितानांभगवत: पाणिने: सूत्राणां व्याकरणशब्दत्वेन व्यावहार: इत्यर्थ:। एवमुक्तेसतिइत्थमाक्षेप: कृत:-

**सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्न:**

व्याकरणं नामसूत्रमिति यद्युच्यते तर्हि**व्याकरणस्य सूत्रम्**इतिषष्ठ्यन्तेनविग्रह: अनुपपन्न:। यतो हि**षष्ठीशेषे**इतिसूत्रेणअत्रषष्ठी विभक्तिर्कर्तव्या। सा च षष्ठीभेदसम्बन्धनिमित्तिका। किञ्चसूत्रशब्देन व्याकरणसूत्रेषुइववेदान्तादिशास्त्रेष्वपि प्रयोग: अस्तीति सूत्रशब्दोऽयं सामान्यार्थस्य वाचक:। व्याकरणशब्दस्तु नतथा सामान्यवाचक: किन्तु**अष्टाध्यायी**तेन बोध्यते। एवञ्चसूत्रंनाम सामान्यम्, व्याकरणं नामविशेष:। अपि च सूत्रशब्देन सम्पूर्णाया: अष्टाध्याय्या: एवग्रहणं स्यात्, एकैकस्य **वृद्धिरादैच्** १/१/१ इत्यादेस्तु योगशब्देनैव ग्रहणं स्यात्। किन्तु एकैकस्यापि **वृद्धिरादैच्** इत्यादे: सूत्रत्वेन

व्यवहार: लोकेप्रसिद्धएव। अत: व्याकरणं नाम सूत्रमित्यर्थ: नवक्तुं शक्य:। व्याकरणशब्देन यदि सूत्रमित्यर्थ: स्वीक्रियते तदा अन्योऽपि आक्षेप: विहित: भाष्ये यथा- **शब्दाप्रतिपत्ति:** इति।

**सूत्रे व्याकरणे षष्ठयर्थोनोपपद्यते- व्याकरणस्य सूत्रम्इति। किंहि तदन्यत् सूत्राद् व्याकरणम्, यस्याद: सूत्रं स्यात्।**

**शब्दाप्रतिपत्ति:**

व्याकरणं नाम सूत्रमित्यर्थेस्वीकारे**व्याकरणस्य सूत्रम्**इति प्रयोग: कर्तुंन पार्यते। अपि च लोकव्यवहारविरोधश्च इत्याशयेन भगवताप्रोक्तम्**– शब्दाप्रतिपत्ति:**।

**शब्दानां चाप्रतिपत्ति: प्राप्नोति – व्याकरणशब्दाच्छब्दान् प्रतिपद्यामहे**इति व्यावहार: लोकेप्रसिद्ध:। अस्य व्यवहारस्य असिद्ध्यापत्ति:। यत: केवलसूत्रेभ्य: शब्दानांप्रतिपत्ति: न दृश्यते। किन्तु व्याख्यानतोऽपि। अत: व्याकरणं नाम सूत्रमित्यर्थाभ्युपगमे द्वितीय: अयं दोष:।

एतदनन्तरं शङ्कितम् **– ननु च तदेवसूत्रंविगृहीतं व्याख्यानं भवति**इति।

व्याख्यानं नाम सूत्रस्यैव विशेषेणग्रहणमर्थात्विवरणम्। एवञ्च व्याख्यानमित्युक्ते नायं विनूल: पदार्थ:,किन्तु सूत्रस्यैव विश्लेषणमितिहेतो: व्याकरणं नाम सूत्रमित्यर्थाभ्युपगमे नकोऽपिविप्रतिपत्ति: इत्यर्थ:।

**व्याकरणशब्दार्थ: नसूत्रमितिनिरूपणम्**

एतदुपरिपुन: आक्षेपत्राउक्तम्-

**नकेवलं चर्चापदानि व्याख्यानम्- वृद्धि:, आत्, ऐच्इति। किंतर्हिउदाहरणं प्रत्युदाहरणं वाक्याध्याहार: – इत्येत्समुदितं व्याख्यानम् भवति।**

व्याख्यानाम नामकेवलं चर्चापदानि यथा - वृद्धि:, आत्, ऐच्इतिपदविभाग:। त्रिपदं सूत्रमित्येतावदेव न, किन्तु सूत्रस्य उदाहरणं, प्रत्युदाहरणं वाक्याध्याहार: सूत्रान्तरेश्रुतानांस्वरितत्वप्रतिज्ञया अध्याहार: अर्थादनुवृत्ति: – इत्येतत्समुदितं नाम समुदाय: भवति व्याख्यानम्। यथा- **हल्ङ्याभ्यो दीर्घात्सुतिस्यपृक्तंहल्**इतिसूत्रंस्वीकृत्य समन्वयं कुर्म:। **लोपो व्योर्वलि**इतिसूत्रात्लोप: इतिपदमनुवर्तते। तस्मिन्सूत्रेतत्पदंभवसाधनम्, प्रकृते तु हल्इति प्रथमाविभक्तयन्तेन सामानाधिकरण्यात् कर्मसाधनंभवति। तेन लुप्यते इत्यर्थ: सिद्ध्यति। अत्र प्रत्युदाहरणानि –

१. हल्ङ्याभ्यो इतिकथनेनग्रामणी: इत्यत्र सू प्रत्ययस्य लोपोन,
२. दीर्घात् इत्युक्त्या निष्कौशाम्बि इत्यत्र स्थानिवद्भावेनङ्यन्तत्वेऽपि दीर्घस्याभावात् नसूलोप:।

३. सुतिसिइतिकथनेनअभैत्सीद् इत्यत्र च्लेः स्थाने विहितस्य सिचः (सि इत्यस्य) नलोपः। तिपा सहचरितस्य सिपः ग्रहणात्सिचः ग्रहणाभावात्।

४. अपृक्तमित्युक्तवा बिभर्ति इत्यत्र तिपः सत्वेऽपि द्व्यल्प्रत्ययत्वेन एकाल्त्वाभावात्नलोपः।

५. हल् इत्युक्तया बिभेद इत्यत्र णलः (अकारस्य) एकाल्त्वेऽपिनलोपः। अन्ये सर्वेऽप्यंशाः दृश्यन्ते।

अतः व्याकरणं नाम सूत्रमित्यर्थस्वीकारे दोषद्वयस्य सम्भवः अस्ति यथा- **१) व्याकरणस्य सूत्रमितिषष्ठर्थः नोपपद्यते। २) शब्दानां प्रतिपत्तिश्च नप्राप्नोतीति**आक्षेप्तुः आशयः।

**<u>व्याकरणशब्दार्थः शब्दः इतिनिरूपणम्</u>**

एवंसतिपक्षान्तरमुपस्थापितं यथा-

**एवंतर्हिशब्दः**इति।

व्याकरणं नामसूत्रमिति वर्णयितुं न शक्यते इति चेत्तर्हिशब्दः इतितदर्थः उच्यते। अत्र व्याक्रियते असौइति व्युत्पत्या शब्दः व्याकरणशब्दवाच्यः। शब्दः नाम अष्टाध्याय्याः लक्ष्यम्। अस्मिन्पक्षे व्याकरणशब्दार्थः शब्दः। स च सूत्रस्य लक्ष्यम्। एवञ्च लक्ष्यलक्षणभावरूपसम्बन्धे षष्ठीविभक्तिरपिसाधुरितिहेतोः व्याकरणस्य सूत्रम्इति प्रयोगः उपपद्यतेएव।

एतदुपरिपुनराक्षेपः कृतः यथा**- शब्देल्युडर्थः**इति।

**भाष्यम्**

यदि शब्दो व्याकरणं ल्युडर्थोनोपपद्यते- व्याक्रियन्ते शब्दाअनेन व्याकरणम्। नहिशब्देनकिञ्चित् व्याक्रियते। केनतर्हि- **सूत्रम्।**

किञ्च व्याकरणं नाम सूत्रमित्युक्ते अन्योऽपि दोषः प्रदर्शितः यथा**- भवे च तद्धितः**इति।

व्याकरणम नाम लक्ष्यमित्यर्थस्याभ्युपगमे अयं तद्धितप्रत्ययः नोपपद्यते। नहिशब्देभव योगः, किन्तुसूत्रेएव। किञ्च मीमांसकानां यागस्यापि वेदशब्दविचारकत्वात् तद्योगस्यापि वैयाकरणत्वप्रसङ्गः। तथाहि भाष्यम्- **भवे च तद्धितोनोपपद्यते- व्याकरणे भवो योगो वैयाकरण इति। नहिशब्देभवो योगः।**

एवमेव व्याकरणं नामशब्दः(लक्ष्यम्) इत्यार्थाङ्गीकारे अन्योऽपि दोषः प्रोक्तः।

यथा– **प्रोक्तादयश्च तद्धिताः**।इति।

एवमेवप्रोक्ताद्यर्थेविहितानां तद्धितप्रत्ययानामप्रवृत्तिप्रसङ्गः। अनया रीत्या व्याकरणं नामशब्दः इत्यर्थस्य स्वीकारेभवार्थेतद्धितः नोपपद्यते। तथाप्रोक्ताद्यर्थे च तद्धितः न स्यादिति च आक्षेपः प्रदर्शितः।

अस्यां दशायामवान्तरप्रश्नः विहितोऽत्र यथा- **किमर्थमिदमुच्यते भवे च तद्धितइति प्रोक्तादयश्च तद्धिताः इति च।** अत्र उत्तरम्- ( परिहारभाष्यम्) **पुरस्तादिदमाचार्येन दृष्टम् – भवे च तद्धितः इतितत्पठितम्। ततउत्तरकालिकमिदं दृष्टम्- प्रोक्तादयश्च तद्धिताः इतितदपिपठितम्। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति इति।**

**अयमाशयः**- कर्मधारयसमासप्रकरणे **विशेषणंविशेष्येण बहुलम्**इतिसूत्रात्परंपठितानि**सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः** इत्यादीनि सूत्राणिप्रपञ्चाथार्नि। एवम्**अलुगुत्तरपदे**इतिसूत्रात्परंपठितानि सूत्राण्यापि प्रपञ्चाथार्नि। अनयैव दिशावार्तिकानांविषयेऽपि **भवे च तद्धिताः**इतिआदौपठित्वातत**: प्रोक्तादयश्च तद्धिताः**इतिप्रपञ्चार्थपठितंवार्तिककृता। अतोनदोषः इतिभावः।

सम्प्रतिशब्दः व्याकरणपदार्थः इतिस्वीकारे ल्युडर्थः नोपपद्यते इत्याक्षेपस्य समाधानं विचार्यते-

**अयं तावद्दोषः** – यद्युच्यते शब्देल्युडर्थः इति। नावश्यं करणाधिकरणयोरेव ल्युड् विधीयते। किन्तु अन्येष्वपिकारकेषु**कृत्यल्युटो बहुलम्**इति । तद्यथा- प्रस्कन्दनम्प्रपतनम्इति।

**अयमाशयः – तव्यत्तव्यानीयरः** इत्यादिभिः सूत्रैः धातोः परत्वेन तव्यदादयः कृत्यप्रत्ययाः विहिताः।इमे च **तयोरेव कृत्यक्तखलर्थाः**इतिवचनानुसारेणभावकर्मणोः विधीयन्ते। अतः शब्दे ल्युडर्थः नोपपद्यते इत्याक्षेपस्य नास्त्यवकाशः। अस्मिन्नवसरे अन्यदपि उत्तरंप्रोक्तं- **अथवाशब्दैरपिशब्दा व्याक्रियन्ते। तद्यथा गौरित्युक्ते सर्वेसन्देहानिवर्तन्तेनाश्वोनगदर्भिः इति।**

**अयं भावः-**व्याकरणशब्दः करणे ल्युडन्तएवभवतु। अथापिन क्षतिः। सूत्रैः एवशब्दैरपिशब्दाः व्याक्रियन्ते एव। यथा कञ्चन पुरुषमुद्दिश्य सास्नादिमति अयं गौः इत्युच्यते चेत् गोशब्दप्रयोगेन अन्येषांशब्दानांनिवृत्तिः भवति। एवञ्च विपरीतस्य व्यावृत्तिः भवतीतिहेतोः शब्दे ल्युडर्थः नोपपद्यते इत्याक्षेपस्य नास्तिसम्भवः।

**व्याकरणं नाम लक्ष्यलक्षणे इतिनिरूपणम्**

एवंतर्हि**लक्ष्यलक्षणे व्याकरणम्**इति। तथा च उदाहरणम् (प्रयोगः) तथासूत्रम् इदमुभयं मिलित्वाव्याकरणपदवाच्यम् भवतीत्यर्थः। तदुपरिपुनः शङ्काप्रदर्शिता- एवमप्ययं दोषः – **समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते। सूत्राणि चाप्यधीयानः इष्यते वैयाकरण इति।**

लक्ष्यं तथालक्षणम् इत्युभयम् मिलित्वा व्याकरणमिति भणितम्। एवंसति कश्चन दोषः आयाति यथा केवलम् अष्टाध्यायीस्थानि सूत्राणि अधीयानः पुरूषः लोके अभिधीयते वैयाकरणः इति। नैव एषः दोषः। समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेऽपि वर्तते।

समुहवाचकाः अपिशब्दाः अवयवबोधका भवन्त्येव इत्यंशः लोकव्यवहारसिद्धः एव। प्रकृतेपि लक्ष्यलक्षणसमुदायवाचकः व्याकरणशब्दः केवलस्य लक्षणस्यापि बोधकः भवत्येवेति नास्ति कश्चन दोषः इत्यभिप्रायः।

एतावता व्याकरणं नामसूत्रंनभवति, लक्षणमपिन भवतीत्युभयं प्रतिपाद्य इदमुभयं मिलित्वा व्याकरणपदवाच्यमिति सिद्धान्तयित्वा तत्रकेवलानां सूत्राणामध्ययने वैयाकरण इति शब्दस्य कथं प्रयोगः इत्याक्षेपे केवलानामवयवानामपि समुदायबोधकत्वं लौकिकदृष्टान्तपुरस्सरंप्रदर्शितम्। एतदनन्तरं लोकव्यवहारानुरोधेन पुनः व्याकरणपदार्थः सूत्रंभवितुमर्हतीतिआद्यः पक्षः व्यवस्थापितः। यथा-

व्याकरणं नामसूत्रमेवेतिपुनः प्रतिपादनम्

**अथपुनरस्तुसूत्रम्।**

**ननु चोक्तंसूत्रे व्याकरणे षष्ठयर्थोऽनुपपन्नः इति। नैषः दोषः व्यापिदेशिवद्भावेन भविष्यति।**

एवं रीत्या व्याकरणशब्दार्थः सूत्रं भवितुमर्हत्येवेति निरूपितम्। किन्तुपूर्वप्रश्नःकृतः आसीत् – नहिसूत्रतः एवशब्दान्प्रतिपाद्यन्ते, व्याख्यानञ्च इति। अविजानतएतदेवंभवति। सूत्रतएवहिशब्दान्प्रतिपाद्यन्ते। आतश्च सूत्रतएव। यो ह्युत्सूत्रं कथयेन्नादौ गृह्यते। इति।

अयमाशयः- उदाहरणं प्रत्युदाहरणं वाक्याध्याहारः इत्यादिकं सूत्रापेक्षया पृथकंभवतीतिमन्दबुद्धेः भावनाभवति। वस्तुतः तदसद्। सर्वमिदं सूत्राल्लभ्यते। अतः सूत्रादेवलोकेशब्दान्विजानन्ति। उत्सृष्टसूत्राक्षरः इष्टयुपसङ्ख्याननैरपेक्ष्येण सूत्राक्षरैरेव सर्वोऽप्यर्थः सिद्धयतीत्याशयः। अत एवोच्यत-

**सूत्रेष्वेवहितत्सर्वं यद्वृत्तौ यच्च वार्तिके।**इति।

इत्थंप्रकारेणसंक्षेपेण सारल्येन वैयाकरणपदवाच्यः सूत्रम्इति मया विचारितम्।

**सहायकग्रन्थसूची**


१. व्याकरणमहाभाष्यम्- पतञ्जलिः, जयशङ्करलालत्रिपाठी, चौखाम्वाकृष्णदासअकादेमी, वाराणसी, २०१३

२. पाणिनीयव्याकरणमहाभाष्यम्, पतञ्जलिः, सत्यभामाबाईपाण्डुरङ्गः, निर्णयसागरमुद्रणालयः, मुम्बई, १९८२

३. व्याकरणमहाभाष्यम्, पतञ्जलिः, पण्डितयुधिष्ठिरमीमांसकः, चौखाम्बाविद्याभवन, वाराणसी, २००१

४. व्याकरणमहाभाष्यम्, पतञ्जलिः, प्रा.वेदप्रकाश:विद्यावाचस्पतिः, मेहरचन्द्रलछमनदासः, नईदिल्ली, २००९

५. वैयाकरणसिद्धान्तकौमुदी, भट्टोजिदीक्षितः, महामहोपाध्याय गिरिधरशर्मा, मोतिलालबनारसीदास, दिल्ली, २०१४